कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ सप्तम काण्डे पञ्चमः प्रश्नः॥

हरिः ओम्॥ गावो॒ वा ए॒तथ्सत्रमा॑सताऽशृङ्गाः॒ सतीः॑ शृङ्गा॑णि नो जायन्ता॒ इति॑ कामे॒न तासां॑ दश॒ मासा॒ निषे॑ण्णा॒ आस॒न्नथ॑ शृङ्गा॒न्यजा॑यन्त॒ ता उ॑दतिष्ठन्नरा॒थ्स्मेत्यथ॑ यासा॒न्नाऽजा॑यन्त॒ ताः संव॑थ्सरमाप्त्वो॒दति॑ष्ठन्नरा॒थ्स्मेति॑ यासा॒ञ्चाऽजा॑यन्त॒ यासा॒ञ्च॑ न ता उ॒भयी॑रुदतिष्ठन्नरा॒थ्स्मेति॑ गोस॒त्रं वै [१] संव॑थ्सरो॒ य एवं विद्वाग्ं॑सः संव॑थ्सरमु॒पय॑न्त्यृ॒ध्नुव॑न्त्ये॒व तस्मा॑त्तू॒परा॑ वार्षि॒कौ मासौ॑ पर्त्वा॑ चरति स॒त्राभि॑जितग्ग् ह्य॑स्यै॒ तस्मा॑थ्संव॒थ्सर॑सदो॒ यत्किञ्च॑ गृ॒हे क्रि॒यते॑ तदाप्त॒मव॑रुद्ध॒मभि॑जितङ्क्रि॒यते॑ समु॒द्रं वा ए॒ते प्र प्ल॑वन्ते॒ ये संव॑थ्सरमु॒पय॑न्ति॒ यो वै स॑मु॒द्रस्य॑ पा॒रं न प॒श्यति॒ न वै स त॒त उदे॑ति॒ संव॑थ्सरो [२] वै स॑मु॒द्रस्तस्यै॒तत्पा॒रं यदति॑रात्रौ॒ य एवं विद्वाग्ं॑सः संव॑थ्सरमु॒पय॑न्त्यना॒र्ता एवोद्व॒चं ग॑च्छन्ती॒यं वै पूर्वोऽति॑रात्रोऽसावु॒त्तरो॒ मनः॑ पू॒र्वो वागु॒त्तरः॒ प्राणः॑ पू॒र्वोऽपा॑न उ॒त्तरः॒ प्रबो॑धनं पू॒र्व उद॑यनमु॒त्तरो॒ ज्योति॑ष्टोमो वैश्वान॒रोऽति॑रात्रो॒ भव॑ति॒ ज्योति॑रेव पु॒रस्ता॒द्दध॑ते सुव॒र्गस्य॑ लो॒कस्याऽनु॑ख्यात्यै चतुर्विग्ं॑शः प्रा॒यणी॑यो॒ भव॑ति॒ चतु॑र्विग्ंशतिरर्धमा॒साः [३] संव॑थ्सरः प्र॒यन्त॑ एव संव॑थ्सरे॒ प्रति॑ तिष्ठन्ति॒ तस्य॒ त्रीणि॑ च श॒तानि॑ षष्टिश्च॒ स्तोत्री॑यास्तावतीः संव॑थ्सरस्य रात्रय॒ उभे॑ एव संव॑थ्सरस्य रू॒पे आप्नु॑वन्ति॒ ते सग्ग्स्थि॑त्या अरिष्ट्या उत्तरै॒रहो॑भिश्चरन्ति॒ षडहा॒ भव॑न्ति॒ षड्वा ऋ॒तवः॑ संव॑थ्सर ऋ॒तुष्वे॑व संव॑थ्सरे॒ प्रति॑ तिष्ठन्ति॒ गौश्चाऽऽयु॑श्च॒ मध्य॑तः॒ स्तोमौ॑ भवतः संव॑थ्सरस्यै॒व तन्मि॑थु॒नं मध्य॑तो [४]

दधति प्रजननाय ज्योतिरभितो भवति विमोचनमेव तच्छन्दाग्स्येव तद्विमोकं यन्त्यथो उभयतोज्योतिषैव षडहेन सुवर्गं लोकं यन्ति ब्रह्मवादिनो वदन्त्यासते केन यन्तीति देवयानेन पथेति ब्रूयाच्छन्दाग्ंसि वै देवयानः पन्था गायत्री त्रिष्टुब्जगती ज्योतिर्वै गायत्री गौस्त्रिष्टुगायुर्जगती यदेते स्तोमा भवन्ति देवयानेनैव [५] तत्पथा यन्ति समानग्ं साम भवति देवलोको वै साम देवलोकादेव न यन्त्यन्याअन्या ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेवाऽन्यमन्यं देवलोकमभ्यारोहन्तो यन्त्यभिवर्तो ब्रह्मसामं भवति सुवर्गस्य लोकस्याऽभिवृत्त्या अभिजिद्भवति सुवर्गस्य लोकस्याऽभिजित्यै विश्वजिद्भवति विश्वस्य जित्यै मासिमासि पृष्ठान्युप यन्ति मासिमास्यतिग्राह्या गृह्यन्ते मासिमास्येव वीर्यं दधति मासां प्रतिष्ठित्या उपरिष्टान्मासां पृष्ठान्युप यन्ति तस्मादुपरिष्टादोषधयः फलं गृह्णन्ति॥[६]

गोसत्रं वा एति संवथ्सरोऽर्धमासा मिथुनम्मध्यतो देवयानेनैव वीर्यन्त्रयोदशं च॥7.5.1॥

गावो वा एतथ्सत्रमासताऽशृङ्गाः सतीः शृङ्गाणि सिषासन्तीस्तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता अब्रुवन्नराथ्स्मोत्तिष्ठामाऽव तङ्गममरुथ्स्महि येन कामेन न्यषदामेति तासामु त्वा अब्रुवन्नर्धा वा यावतीर्वाऽऽसामहा एवेमौ द्वादशौ मासौ संवथ्सरग्ं सं पाद्योत्तिष्ठामेति तासा– [७] न्द्वादशे मासि शृङ्गाणि प्राऽवर्तन्त श्रद्धया वाऽश्रद्धया वा ता इमा यास्तूपरा उभय्यो वाव ता आर्ध्नुवन् याश्च शृङ्गाण्यसन्वन् याश्चोर्जमवारुन्धतर्ध्नोति दशसु मासूत्तिष्ठन्नृध्नोति द्वादशसु य एवं वेद पदेन खलु वा एते यन्ति विन्दति खलु वै पदेन यन्तद्वा एतदृद्धमयनं तस्मादेतद्गोसनि॥[८]

तिष्ठामेति तासान्तस्माद्द्वे च॥7.5.2॥

प्रथमे मासि पृष्ठान्युप यन्ति मध्यम उप यन्त्युत्तम उप यन्ति तदाहुर्यां वै त्रिरेकस्याऽह्न उपसीदन्ति दहं वै साऽपराभ्यां दोहाभ्यां दुहेऽथ कुतः सा धोक्ष्यते यां द्वादश कृत्व उपसीदन्तीति संवथ्सरग्ं सं पाद्योत्तमे मासि सकृत्पृष्ठान्युपेयुस्तद्यजमाना यज्ञं पशूनव रुन्धते समुद्रं वा [९] एतेऽनवारमपारं प्र प्लवन्ते ये संवथ्सरमुपयन्ति यद्बृहद्रथंतरे अन्वर्जेयुर्यथा मध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक्तदनुथ्सर्गं बृहद्रथंतराभ्यामित्वा प्रतिष्ठाङ्गच्छन्ति सर्वेभ्यो वै कामेभ्यः संधिर्दुहे तद्यजमानाः सर्वान्कामानव रुन्धते॥[१०]

समुद्रं वै चतुस्त्रिग्ंशच्च॥7.5.3॥

समान्य ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेव न यन्त्यन्यदन्यथ्साम भवति देवलोको वै साम देवलोकादेवाऽन्यमन्यं मनुष्यलोकं प्रत्यवरोहन्तो यन्ति जगतीमग्र उप यन्ति जगतीं वै छन्दाग्ंसि प्रत्यवरोहन्त्याग्रयणं ग्रहा बृहत्पृष्ठानि त्रयस्त्रिग्ंशग्ग् स्तोमास्तस्माज्ज्यायाग्ंसं कनीयान्प्रत्यवरोहति वैश्वकर्मणो गृह्यते विश्वान्येव तेन कर्माणि यजमाना अव रुन्धत आदित्यो [११] गृह्यत इयं वा अदितिरस्यामेव प्रति तिष्ठन्त्यन्योऽन्यो गृह्येते मिथुनत्वाय प्रजात्या अवान्तरं वै दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एताग्ं ह वा उदङ्कः शौल्बायनः सत्रस्यर्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यद्धर्या अथो यदेव पूर्वेष्वहस्सु विलोम क्रियते तस्यैवैषा शान्तिः॥[१२]

आदित्यस्तस्यैव द्वे च॥7.5.4॥

यदि सोमौ सग्ंसुतौ स्यातां महति रात्रियै प्रातरनुवाकमुपाकुर्यात्पूर्वो वाचं पूर्वो देवताः पूर्वश्छन्दाग्ंसि वृङ्क्ते वृषण्वतीं प्रतिपदं कुर्यात्प्रातःसवनादेवैषामिन्द्रं वृङ्क्तेऽथो खल्वाहुः सवनमुखेसवनमुखे कार्येति सवनमुखाथ्सवनमुखादेवैषामिन्द्रं वृङ्क्ते संवेशायोपवेशाय गायत्रियास्त्रिष्टुभो जगत्या अनुष्टुभः पङ्क्त्या अभिभूत्यै स्वाहा छन्दाग्ंसि वै संवेश उपवेशश्छन्दोभिरेवैषा- [१३] ञ्छन्दाग्ंसि वृङ्क्ते सजनीयग्ं शस्यं विहव्यग्ं शस्यमगस्त्यस्य कयाशुभीयग्ं शस्यमेतावद्वा अस्ति यावदेतद्यावदेवाऽस्ति तदेषां वृङ्क्ते यदि प्रातः सवने कलशो दीर्येत वैष्णवीषु शिपिविष्टवतीषु स्तुवीरन्यद्वै यज्ञस्याऽतिरिच्यते विष्णुं तच्छिपिविष्टमभ्यति रिच्यते तद्विष्णुः शिपिविष्टोऽतिरिक्त एवातिरिक्तं दधात्यथो अतिरिक्तेनैवाऽतिरिक्तमाप्त्वाऽव रुन्धते यदि मध्यन्दिने दीर्येत वषट्कारनिधनग्ं साम कुर्युर्वषट्कारो वै यज्ञस्य प्रतिष्ठा प्रतिष्ठामेवैनद्गमयन्ति यदि तृतीयसवन एतदेव॥[१४]

छन्दोभिरेवैषामवैकान्न विग्ंशतिश्च॥7.5.5॥

षडहैर्मासान्थ्संपाद्याऽहरुथ्सृजन्ति षडहैर्हि मासान्थ्सं पश्यन्त्यर्धमासैर्मासान्थ्संपाद्याऽहरुथ्सृजनत्यर्धमासैर्हि मासान्थ्संपश्यन्त्यमावाययया मासान्थ्संपाद्याऽहरुथ्सृजन्त्यमावास्यया हि मासान्थ्सं पश्यन्ति पौर्णमास्या मासान्थ्संपाद्याऽहरुथ्सृजन्ति पौर्णमास्या हि मासान्थ्सं पश्यन्ति यो वै पूर्ण आसिञ्चति परा स सिञ्चति यः पूर्णादुदचति [१५] प्राणमस्मिन्थ्स दधाति

यत्पौर्णमास्या मासान्थ्संपाद्याऽहरुथ्सृजन्ति संवथ्सरायैव तत्प्राणं दधति तदनु सत्रिणः प्राऽणन्ति यदहर्नोथ्सृजेयुर्यथा दृतिरुपनद्धो वि पतत्येवग्ं संवथ्सरो विपतेदार्तिमार्छेयुर्यत्पौर्णमास्या मासान्थ्संपाद्याऽहरुथ्सृजन्ति संवथ्सरायैव तदुदानं दधति तदनु सत्रिण उ- [१६] दनन्ति नाऽऽर्तिमार्छन्ति पूर्णमासे वै देवानाग्ं सुतो यत्पौर्णमास्या मासान्थ्संपाद्याऽहरुथ्सृजन्ति देवानामेव तद्यज्ञेन यज्ञं प्रत्यवरोहन्ति वि वा एतद्यज्ञं छिन्दन्ति यत्षडहसं ततग्ंसन्तमथाऽहरुथ्सृजन्ति प्राजापत्यं पशुमालभन्ते प्रजापतिः सर्वा देवता देवताभिरेव यज्ञग्ं सं तन्वन्ति यन्ति वा एते सवनाद्येऽह- [१७] रुथ्सृजन्ति तुरीयङ्ह्लु वा एतथ्सवनं यथ्सान्नाय्यं यथ्सान्नाय्यं भवति तेनैव सवनान्न यन्ति समुपहूय भक्षयन्त्येतथ्सोमपीथा ह्येतर्हि यथायतनं वा एतेषाग्ं सवनभाजो देवता गच्छन्ति येऽहरुथ्सृजन्त्यनुसवनं पुरोडाशान्निर्वपन्ति यथायतनादेव सवनभाजो देवता अव रुन्धतेऽष्टाकपालान्प्रातः सवन एकादशकपालान्माध्यंदिने सवने द्वादशकपालाग्ग्स्तृतीयसवने छन्दाग्ंस्येवाऽऽप्त्वाऽव रुन्धते वैश्वदेवञ्चरुं तृतीयसवने निर्वपन्ति वै श्वदेवं वैतृतीयसवनं तेनैव तृतीयसवनान्न यन्ति॥[१८]

उदचत्युद्योऽहराप्त्वा पञ्चदश च||**7.5.6**||

उथ्सृज्यां ३ नोथ्सृज्या ३ मिति मीमाग्ंसन्ते ब्रह्मवादिनस्तद्वाहुरुथ्सृज्यमेवेत्यमावास्यायाञ्च पौर्णमास्याञ्चोथ्सृज्यमित्याहुरेते हि यज्ञं वहत इति ते त्वाव नोथ्सृज्ये इत्याहुर्ये अवान्तरं यज्ञम्भेजाते इति या प्रथमा व्यष्टका तस्यामुथ्सृज्यमित्याहुरेष वै मासो विशर इति नाऽऽदिष्ट- [१९]

मुथ्सृजेयुर्यदादिष्टमुथ्सृजेयुर्यादृशे पुनः पर्याप्लावे मध्ये षडहस्य सं पद्येत षडहैर्मासान्थ्सं पाद्य यथ्सप्तममहस्तस्मिन्नुथ्सृज्येयुस्तदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेयुरैन्द्रं दधीन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वैश्वदेवं द्वादशकपालमग्नेर्वै वसुमतः प्रातः सवनं यदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्ति [२०] सवनमष्टाभिरुप यन्ति यदैन्द्रं दधि भवतीन्द्रमेव तद्भागधेयान्न च्यावयन्तीन्द्रस्य वै मरुत्वतो माध्यन्दिनग्ं सवनं यदिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्ति सवनमेकादशभिरुप यन्ति विश्वेषां वै देवानामृभुमतां तृतीयसवनं यद्वैश्वदेवं द्वादशकपालं निर्वपन्ति देवता एव तद्भागिनीः कुर्वन्ति सवनं द्वादशभि– [२१] रुप यन्ति प्राजापत्यं पशुमा लभन्ते यज्ञो वै प्रजापतिर्यज्ञस्याऽननुसर्गायाऽभिवर्त इतः षण्मासो ब्रह्मसामं भवति ब्रह्म वा अभिवर्तो ब्रह्मणैव तथ्सुवर्गं लोकमभिवर्तयन्तो यन्ति प्रतिकूलमिव हीतः सुवर्गो लोकैन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा। शिक्षा नो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहीत्यमुत आयताग्ं षण्मासो ब्रह्मसामं भवत्ययं वै लोको ज्योतिः प्रजा ज्योतिरिममेव तल्लोकं पश्यन्तोऽभिवदन्त आ यन्ति॥[२२]

नाऽऽदिष्टङ्कुर्वन्ति द्वादशभिरिति विग्ंशतिश्च॥7.5.7॥

देवानां वा अन्तञ्जग्मुषामिन्द्रियं वीर्यमपाऽक्रामत्तत्क्रोशेनाऽवाऽरुन्धत तत्क्रोशस्य क्रोशत्वं यत्क्रोशेन चात्वालस्याऽन्ते स्तुवन्ति यज्ञस्यैवाऽन्तङ्गत्वेन्द्रियं वीर्यमव रुन्धते सत्रस्यधर्याऽऽहवनीयस्याऽन्ते स्तुवन्त्यग्निमेवोपद्रष्टारं कृत्वर्धिमुप यन्ति

प्रजापतेर्हृदयेन हविर्धानेऽन्तः स्तुवन्ति प्रेमाणमेवाऽस्य गच्छन्ति श्लोकेन पुरस्ताथ्सदसः [२३] स्तुवन्त्यनुश्लोकेन पश्चाद्यज्ञस्यैवाऽन्तङ्कृत्वा श्लोकभाजो भवन्ति नवभिरध्वर्युरुद्गायति नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति सर्वा ऐन्द्रियो भवन्ति प्राणेष्वेवेन्द्रियं दधत्यप्रतिहृताभिरुद्गायति तस्मात्पुरुषः सर्वाण्यन्यानि शीर्ष्णोऽङ्गानि प्रत्यचति शिर एव न पञ्चदशग्ं रथन्तरं भवतीन्द्रियमेवाऽव रुन्धते सप्तदशं [२४] बृहदन्नाद्यस्याऽवरुद्ध्या अथो प्रैव तेन जायन्त एकविग्ंशं भद्रं द्विपदासु प्रतिष्ठित्यै पन्नय उप गायन्ति मिथुनत्वाय प्रजात्यै प्रजापतिः प्रजा असृजत सोऽकामयताऽऽसामहग्ं राज्यं परीयामिति तासाग्ं राजनेनैव राज्यं पर्यैत्तद्राजनस्य राजनत्वं यद्राजनं भवति प्रजानामेव तद्यजमाना राज्यं परि यन्ति पञ्चविग्ंशं भवति प्रजापते– [२५] राप्त्यै पञ्चभिस्तिष्ठन्तः स्तुवन्ति देवलोकमेवाऽभि जयन्ति पञ्चभिरासीना मनुष्यलोकमेवाऽभि जयन्ति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवाऽन्नाद्यमव रुन्धते पञ्चधा विनिषद्य स्तुवन्ति पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्येकैकयाऽस्तुतया समायन्ति दिग्भ्य एवाऽन्नाद्यग्ं सम्भरन्ति ताभिरुद्गातोद्गायति दिग्भ्य एवाऽन्नाद्यग्ं [२६] संभृत्य तेज आत्मन्दधते तस्मादेकः प्राणः सर्वाण्यङ्गान्यवत्यथो यथा सुपर्ण उत्पतिष्यङ्छिर उत्तमं कुरुत एवमेव तद्यजमानाः प्रजानामुत्तमा भवन्त्यासन्दीमुद्गाताऽऽ रोहति साम्राज्यमेव गच्छन्ति प्लेङ्खग्ं होता नाकस्यैव पृष्ठग्ं रोहन्ति कूर्चावध्वर्युर्ब्रध्नस्यैव विष्टपं गच्छन्त्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठन्त्यथो आक्रमणमेव तथ्सेतुं यजमानाः कुर्वते सुवर्गस्य लोकस्य समष्ट्यै॥[२७]

सदसस्सप्तदसं प्रजापतेर्गायति दिग्भ्य एवाऽन्नाद्यं प्रत्येकादश च॥7.5.8॥

अक्र्येण वै सहस्रशः प्रजापतिः प्रजा असृजत ताभ्य इलान्देनेराँल्लूतामवाऽरुन्ध यदक्र्यं भवति प्रजा एव तद्यजमानाः सृजन्त इलान्दं भवति प्रजाभ्य एव सृष्टाभ्य इराँल्लूतामव रुन्धते तस्माद्याग्ं समाग्ं सत्रग्ं समृद्धं क्षोधुकास्ताग्ं समां प्रजा इषग्ग् ह्यासामूर्जमाददते याग्ं समां व्यृद्धमक्षोधुकास्ताग्ं समां प्रजा [२८] न ह्यासामिषमूर्जमाददत उत्क्रोदं कुर्वते यथा बन्धान्मुमुचाना उत्क्रोदं कुर्वत एवमेव तद्यजमाना देवबन्धान्मुमुचाना उत्क्रोदं कुर्वत इषमूर्जमात्मन्दधाना वाणः शततन्तुर्भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्याजिं धावन्त्यनभिजितस्याऽभिजित्यै दुन्दुभीन्थ्समाघ्नन्ति परमा वा एषा वाग्या दुन्दुभौ परमामेव [२९] वाचमव रुन्धते भूमिदुन्दुभिमा घ्नन्ति यैवेमां वाक्प्रविष्टा तामेवाऽव रुन्धतेऽथो इमामेव जयन्ति सर्वा वाचो वदन्ति सर्वासां वाचामवरुद्ध्या आर्द्रे चर्मन्व्यायच्छेते इन्द्रियस्याऽवरुद्ध्या आऽन्यः क्रोशति प्राऽन्यः शग्ंसति य आक्रोशति पुनात्येवैनान्थ्स यः प्रशग्ंसति पूतेष्वेवाऽन्नाद्यं दधात्यृषिकृतं च [३०] वा एते देवकृतं च पूर्वैर्मासैरव रुन्धते यद्भूतेच्छदाग्ं सामानि भवन्त्युभयस्याऽवरुद्ध्यै यन्ति वा एते मिथुनाद्ये संवथ्सरमुपयन्त्यन्तर्वेदि मिथुनौ सम्भवतस्तेनैव मिथुनान्न यन्ति॥[३१]

*व्यृधमक्षोधुकास्ताग्ं समां प्रजाः परमामेव च त्रिग्ंशच्च॥**7.5.9***॥

चर्माऽव भिन्दन्ति पाप्मानमेवैषामव भिन्दन्ति माऽप राथ्सीर्माऽति व्याथ्सीरित्याह सं प्रत्येवैषां पाप्मानमव भिन्दन्त्युदकुम्भानधिनिधाय दास्यो मार्जालीयं परि नृत्यन्ति

पदो निघ्नतीरिदं मधुं गायन्त्यो मधु वै देवानां परममन्नाद्यं परममेवाऽन्नाद्यमव रुन्धते पदो नि घ्नन्ति महीयामेवैषु दधति॥[३२]

चर्मैकान्न पञ्चाशत्॥7.5.10॥

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा सं प्लोष्यते स्वाहा सं प्लवमानाय स्वाहा सं प्लुताय स्वाहा मेधायिष्यते स्वाहा मेघायते स्वाहा मेघिताय स्वाहा मेघाय स्वाहा नीहाराय स्वाहा निहाकायै स्वाहा प्रासचाय स्वाहा प्रचलाकायै स्वाहा विद्योतिष्यते स्वाहा विद्योतमानाय स्वाहा संविद्योतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहोग्रग्ग् स्तनयते स्वाहा वर्षिष्यते स्वाहा वर्षते स्वाहाऽभिवर्षते स्वाहा परिवर्षते स्वाहा संवर्षते [३३] स्वाहाऽनुवर्षते स्वाहा शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहा प्रोषिष्यते स्वाहा प्रुष्णते स्वाहा परिप्रुष्णते स्वाहोद्ग्रहीष्यते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लवमानाय स्वाहा विप्लुताय स्वाहाऽतप्स्यते स्वाहाऽऽतपते स्वाहोग्रमातपते स्वाहर्ग्भ्यः स्वाहा यजुर्भ्यः स्वाहा सामभ्यः स्वाहाऽङ्गिरोभ्यः स्वाहा वेदेभ्यः स्वाहा गाथाभ्यः स्वाहा नाराशग्ंसीभ्यः स्वाहा रैभीभ्यः स्वाहा सर्वस्मै स्वाहा॥[३४]

संवर्षते रैभीभ्यस्स्वाहा द्वे च॥7.5.11॥

दत्वते स्वाहाऽदन्तकाय स्वाहा प्राणिने स्वाहाऽप्राणाय स्वाहा मुखवते स्वाहाऽमुखाय स्वाहा नासिकवते स्वाहाऽनासिकाय स्वाहाऽक्षण्वते स्वाहाऽनसिकाय

स्वाहाकर्णिने स्वाहाऽकर्णकाय स्वाहा शीर्ष्णवते स्वाहाऽशीर्षकाय स्वाहा पद्वते स्वाहाऽपादकाय स्वाहा प्राणते स्वाहाऽप्राणते स्वाहा वदते स्वाहाऽवदते स्वाहा पश्यते स्वाहाऽपश्यते स्वाहा शृण्वते स्वाहाऽशृण्वते स्वाहा मनस्विने स्वाहा– [३५]
ऽमनसे स्वाहा रेतस्विने स्वाहाऽरेतस्काय स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहालोमवते स्वाहाऽलोमकाय स्वाहा त्वचे स्वाहाऽत्वक्काय स्वाहा चर्मण्वते स्वाहाऽचर्मकाय स्वाहा लोहितवते स्वाहाऽलोहिताय स्वाहा माग्ंसन्वते स्वाहाऽमाग्ंसकाय स्वाहा स्नावभ्यः स्वाहाऽस्नावकाय स्वाहाऽस्थन्वते स्वाहाऽनस्थिकाय स्वाहा मज्जन्वते स्वाहाऽमज्जकाय स्वाहाऽङ्गिने स्वाहाऽनङ्गाय स्वाहाऽऽत्मने स्वाहाऽनात्मने स्वाहा सर्वस्मै स्वाहा॥[३६]

मनस्विने स्वाहाऽनात्मने स्वाहा द्वे च॥7.5.12॥

कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वस्य यज्ञस्यद्धर्यै मह्यग्ं संनत्या अमुष्मै कामायाऽऽयुषे त्वा प्राणाय त्वाऽपानाय त्वा व्यानाय त्वाव्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा घोषाय त्वा पोषाय त्वाऽऽराद्घोषाय त्वाप्रच्युत्यै त्वा॥[३७]

कस्त्वाऽष्टात्रिग्ंशत्॥7.5.13॥

अग्नये गायत्राय त्रिवृते राथन्तराय वासन्तायाऽष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्मायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविग्ंशाभ्यां वैराजाभ्यार्ग्ं शारदाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय हैमन्तिकाय

चरुः सवित्र आतिच्छन्दसाय त्रयस्त्रिग्ंशाय रैवताय शौशिराय द्वादशकपालोऽदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्यै चरुः काय एककपालः॥[३८]

अग्नयेऽदित्या अनुमत्यै सप्तचत्वारिग्ंशत्॥7.5.14॥

यो वा अग्नावग्निः प्रह्रियते यश्च सोमो राजा तयोरेष आतिथ्यं यदग्नीषोमीयोऽथैष रुद्रो यश्चीयते यथ्संचितेऽग्नावेतानि हवीग्ंषि न निर्वपेदेष एव रुद्रोऽशान्त उपोत्थाय प्रजां पशून् यजमानस्याऽभि मन्येत यथ्संचितेऽग्नावेतानि हवीग्ंषि निर्वपति भागधेयेनैवैनग्ं शमयति नाऽस्य रुद्रोऽशान्त [३९] उपोत्थाय प्रजां पशूनभि मन्यते दश हवीग्ंषि भवन्ति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव यजमाने दधात्यथो दशाक्षरा विराडन्नंविराड्वराज्येवाऽन्नाद्ये प्रति तिष्ठत्यृतुभिर्वा एष छन्दोभिः स्तोमैः पृष्ठैश्चेतव्य इत्याहुर्यदेतानि हवीग्ंषि निर्वपत्यृतुभिरेवैनं छन्दोभिः स्तोमैः पृष्ठैश्चिनुते दिशः सुषुवाणेना- [४०] ऽभिजित्या इत्याहुर्यदेतानि हवीग्ंषि निर्वपति दिशामभिजित्या एतया वा इन्द्रं देवा अयाजयन्तस्मादिन्द्रसव एतया मनुं मनुष्यास्तस्मान्मनुसवो यथेन्द्रो देवानां यथा मनुर्मनुष्याणामेवं भवति य एवं विद्वानेतयेष्ट्या यजते दिग्वतीः पुरोऽनुवाक्या भवन्ति सर्वासां दिशामभिजित्यै॥[४१]

अशान्तस्सुषुवाणेनैक चत्वारिग्ंशच्च॥7.5.15॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥ उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टङ्गृह्णामि तस्य ते द्यौर्महिमा नक्षत्राणि रूपमादित्यस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा॥[४२]

यः प्राणतो द्यौरादित्योऽष्टात्रिग्ं शत्॥7.5.16॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम॥ उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टङ्गृह्णामि तस्य ते पृथिवी महिमौषधयो वनस्पतयो रूपमग्निस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा॥[४३]

य आत्मदाः पृथिव्यग्निरेकान्न चत्वारिग्ं शत्॥7.5.17॥

आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाऽस्मिन्राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽऽस्य यजमानस्य वीरो जायतां निकामेनिकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥[४४]

आ ब्रह्मनेक चत्वारिग्ं शत्॥7.5.18॥

आऽक्रान् वाजी पृथिवीमग्निं युजमकृत वाज्यर्वाऽऽक्रान् वाज्यन्तरिक्षं वायुं युजमकृत वाज्यर्वा द्यां वाज्याऽक्रग्स्त सूर्यं युजमकृत वाज्यर्वाऽग्निस्ते वाजिन् युङ्क्तु त्वाऽऽ रभे स्वस्ति मा सं पारय वायुस्ते वाजिन् युङ्क्तु त्वाऽऽ रभे स्वस्ति मा सं [४५] पारयाऽऽदित्यस्ते वाजिन् युङ्क्तु त्वाऽऽ रभे स्वस्ति मा सं पारय प्राणधृगसि प्राणं मे दृग्ंह व्यानधृगसि व्यानं मे दृग्ंहाऽपानधृगस्यपानं मे दृग्ंह चक्षुरसि चक्षुर्मयि धेहि श्रोत्रमसि श्रोत्रं मयि धेह्यायुरस्यायुमयि धेहि॥[४६]

वायुस्ते वाजिन्युङ्क्तु त्वाऽऽ रभे स्वस्ति मा सन्त्रिचत्वारिग्ंशच्च॥7.5.19॥

जज्ञि बीजं वर्ष्टा पर्जन्यः पक्ता सस्यग्ं सुप्पिला ओषधयः स्वधिचरणेयग्ं सूपसदनोऽग्निः स्वध्यक्षमन्तरिक्षग्ं सुपावः पवमानः सूपस्थाना द्यौः शिवमसौ तपन्यथापूर्वमहोरात्रे पञ्चदशिनोऽर्धमासास्त्रिग्ंशिनो मासाः क्लुप्ता ऋतवः शान्तः संवथ्सरः॥[४७]

जज्ञि बीजमेकत्रिग्ंशत्॥7.5.20॥

आग्नेयोऽष्टाकपालः सौम्यश्चरुः सावित्रोऽष्टाकपालः पौष्णश्चरूरौद्रश्चरुरग्नये वैश्वानराय द्वादशकपालो मृगाखरे यदि नाऽऽगच्छेदग्नयेऽग्ंहोमुचेऽष्टाकपालः सौर्यं पयो वायव्य आज्यभागः॥[४८]

आग्नेयश्चतुर्विग्ंशतिः॥7.5.21॥

अग्नयेऽग्ंहोमुचेऽष्टाकपाल इन्द्रायाऽग्ंहोमुच एकादशकपालो मित्रावरुणाभ्यामागोमुग्भ्यां पयस्या वायोसावित्र आगोमुग्भ्यां चरुरश्विभ्यामागोमुग्भ्यां धाना मरुद्भ्य एनोमुग्भ्यः सप्तकपालो विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपालोऽनुमत्यै चरुरग्नये वैश्वानराय द्वादशकपालो द्यावापृथिवीभ्यामग्ंहोमुग्भ्यां द्विकपालः॥[४९]

अग्नयेऽग्ंहोमुचे त्रिग्ंशत्॥7.5.22॥

अग्नये समनमत्पृथिव्यै समनमद्यथाऽग्निः पृथिव्या समनमदेवं मह्यं भद्राः संनतयः सं नमन्तु वायवे समनमदन्तरिक्षाय समनमद्यथा वायुरन्तरिक्षेण सूर्याय समनमद्दिवे समनमद्यथा सूर्यो दिवा चन्द्रमसे समनमन्नक्षत्रेभ्यः समनमद्यथा चन्द्रमा नक्षत्रैर्वरुणाय समनमदद्भ्यः समनमद्यथा [५०] वरुणोऽद्भिः साम्ने समनमदृचे समनमद्यथा सामर्चा ब्रह्मणे समनमत्क्षत्राय समनमद्यथा ब्रह्म क्षत्रेण राज्ञे समनमद्विशे समनमद्यथा राजा विशा रथाय समनमदश्वेभ्यः समनमद्यथा रथोऽश्वैः प्रजापतये समनमद्भूतेभ्यः समनमद्यथा प्रजापतिर्भूतैः समनमदेवं मह्यं भद्राः संनतयः सं नमन्तु॥[५१]

अद्भ्यस्समनमद्यथा मह्यञ्चत्वारिंच॥7.5.23॥

ये ते पन्थानः सवितः पूर्व्यासोऽरेणवो वितता अन्तरिक्षे। तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च देव ब्रूहि॥ नमोऽग्नये पृथिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमो वायवेऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमः सूर्याय दिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि॥[५२]

ये ते चतुश्चत्वारिंशत्॥7.5.24॥

यो वा अश्वस्य मेध्यस्य शिरो वेद शीर्षण्वान्मेध्यो भवत्युषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं दिशः पादा अवान्तरदिशाः पर्शवोऽहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः संधानान्यृतवोऽङ्गानि संवथ्सर आत्मा रश्मयः केशा नक्षत्राणि रूपं तारका अस्थानि नभो मांसान्योषधयो लोमानि वनस्पतयो वाला

अग्निर्मुखं वैश्वानरो व्यात्तग्ं [५३] समुद्र उदरमन्तरिक्षं पायुर्द्यावापृथिवी आण्डौ ग्रावा शेपः सोमो रेतो यज्जञ्जभ्यते तद्वि द्योतते यद्विधूनुते तथ्स्तनयति यन्मेहति तद्वर्षति वागेवाऽस्य वागहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु जायत एतौ वै महिमानावश्वमभितः सम्बभूवतुर्हयो देवानवहदर्वाऽसुरान् वाजी गन्धर्वानश्वो मनुष्यान्थ्समुद्रो वा अश्वस्य योनिः समुद्रो बन्धुः॥[५४]

व्यात्तमवहद्दादश च॥7.5.25॥

गावो गावस्सिषासन्तीः प्रथमे मासि समान्ये यदि सोमौ षडहैरुथ्सृज्या (३) न्देवानामर्क्येण चर्माऽवए पृथिव्यै दत्वते कस्त्वाऽग्नये यो वै यः प्राणतो य आत्मदा आ ब्रह्मन्नाऽक्राज्जज्ञि बीजमानेयोऽष्टाकपालोऽग्नयेऽग्ंहोमुचेऽष्टाकपालोऽग्नये समनमद्धे ते पन्थानो यो वा अश्वस्य मेध्यस्य शिरः पञ्चविग्ंशतिः॥25॥

गावस्समान्यस्सवनमष्टाभिर्वा एते देवकृतञ्चाऽभिजित्या इत्याहुर्वरुणोऽद्धिस्सान्मे चतुष्पञ्चाशत्॥५४॥

गावस्समुद्रो बन्धुः॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति सप्तम काण्डे पञ्चमः प्रश्नः॥

॥सप्तम काण्डः समाप्तः॥

॥सप्तम काण्डस्य सन्देहनिरासपाठः॥

रुन्धते दधते तिष्ठन्ते जायन्ते। प्रजननमङ्गिरसोऽत्रिर्जमदग्निस्संवथ्सरः कुसुरुबिन्दस्सप्तरात्रं बृहस्पतिरष्टरात्रं प्रजापतिस्ताः क्षुधन्नवरात्रं प्रजापतिरकामयत दशहोतारं वर्जयित्वा। संवथ्सरो नैकविग्ंशः। साध्या न पञ्चविग्ंशः। कुसुरुबिन्दो न त्रयस्त्रिग्ंशः। बृहस्पतिस्सर्वम्। द्वाभ्यामष्टानवत्यै। चतुर्भ्यष्षण्णवत्यै। पञ्चभ्यः पञ्चनवत्यै। च प च प परिगृहीत्यै। षट्प्रजायै परिऋहीत्यै। षडिन्द्रियस्य परिगृहीत्यै। षट्थ्सुवर्गस्य लोकस्य परिगृहीत्यै। सप्तेन्दियस्य वीर्यस्य प्रजायै पशूनां परिगृहीत्यै। अष्ट त्रि सप्ताऽन्नाद्यस्य परिगृहीत्यै। नव ब्रह्मवर्चसस्याऽन्नाद्यस्य परिगृहीत्यै। दश प्र द्वितीयो ब्रह्मचर्चसस्य परिगृहीत्यै। प्र प स नव प्र द्वि च बृहद्रथन्तराभ्यां प स नव यदन्यतः। यत्र यत्र बृहद्रथन्तराभ्यान्तत्रतत्र पराञ्चः। साध्याबृहस्पती वर्जयित्वा। षष्ठेऽष्टमे प्रथमे द्वितीये पुनष्षष्ठेऽसत्रम्। सा विराडूर्ध्वन्न्यहा भवन्ति। वसिष्ठस्तैः। अम्बे प्रथमन्नयति। यथा वै षडहः। क्षुथ्सदृङ्क्षु। प्रथमं मोदचतुर्त्थम्। द्वितीयं मोदसप्तमम्। प्रथमं पोष्णवर्जम्। द्वितीयमैन्द्रवर्जम्। ऋतव आदित्या गावो ज्येतिर्ज्योतिः। आङ्गिरस इयावेति आदित्या इयावेति। सुवर्गँल्लोकमयामेति॥

॥अनुवाकमध्यगताः वाक्यान्ताः पञ्चाशतः॥

उभा वाग्ं होतर्दोषाऽगन्म सुवस्सञ्ज्योतिषा सोमाय पितृमते सुवानस्सोमो वर्धन्तु त्वा राजन्दिवोऽस्य जगतो राणो वीहि कव्यवाहन पितृन्कर्मण्यस्स्वधायै नमो

मन्यासै शं प्र देवगं् सन्ते वायुरग्ने यं यज्ञङ्क्षये पाथा ध्रुवक्षितिरपाऽमतिँव्रतमेकाऽस्य सुमतावग्निवृत्राणि चर्षणीनां य इमा वीरश्शतमन्युः पयसा महीङ्गागं् सुहिरण्ये शुक्रास्ताः पुष्टं पशु मन्यते त्रिग्ंशत्॥३०॥

॥हरिः ओम्॥

------***